aglasem.com

FOR HARYANA CLASS 9 PREPARATION

HBSE Class 9 Sample Paper 2027 Sanskrit

EXAM	YEAR	TYPE	SUBJECT
Haryana Class 9	2027	Sample Paper	Sanskrit

आदर्शप्रश्नपत्रम् (2026-27)

कक्षा - नवमी **कोड न. - 049**

रोल नं० | | | | | |

संस्कृतम्

समयः - 3 होराः] [पूर्णाङ्काः : 80

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 9 तथा प्रश्न 18 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना / पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

- **सामान्यनिर्देशाः :–**

(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iii) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति :–**

खण्डः 'क'	अपठित-अवबोधनम्	- 10 अङ्काः
खण्डः 'ख'	रचनात्मक-कार्यम्	- 10 अङ्काः
खण्डः 'ग'	पठित-अवबोधनम्	- 24 अङ्काः
खण्डः 'घ'	अनुप्रयुक्त-व्याकरणम्	- 19 अङ्काः
खण्डः 'ङ'	पाठाधारिताः बहुविकल्पीयाः प्रश्नाः	- 17 अङ्काः

खण्डः 'क'

अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत –

हिमालयः भारतस्य उत्तरदिशायाम् स्थितः अस्ति। अस्य शिखराणि सर्ववर्षं हिमेन आच्छादितानि सन्ति। अयं हिमस्य आलयः इति हिमालयः अस्ति। अनेके रुग्णाः जनाः अपि तस्य पवित्रे वातावरणे स्वस्थाः भवन्ति। हिमालयः प्रहरी इव भारतं रक्षति। अस्य रक्षणे एव भारतस्य रक्षणम्।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(क) हिमालयः कुत्र स्थितः अस्ति?
(ख) अस्य शिखराणि केन आच्छादितानि सन्ति?
(ग) कः भारतं रक्षति?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(क) कस्य रक्षणे एव भारतस्य रक्षणम्?
(ख) के तस्य पवित्रे वातावरणे स्वस्थाः भवन्ति?
(ग) हिमालयस्य कानि हिमेन आच्छादितानि सन्ति?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1

(द) यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्) 3×1=3

(क) 'स्थितः' अत्र कः प्रत्ययः?

(i) तुमुन् (ii) तुम्
(iii) णमुल् (iv) क्त

(ख) 'भवन्ति' पदे कः लकारः?

(i) लङ्लकारः (ii) लोट् लकारः
(iii) लट् लकारः (iv) विधिलिङ् लकारः

(ग) 'रुग्णाः जनाः' अत्र विशेषणपदं किम् अस्ति?

(i) रुग्णाः (ii) जनाः
(iii) भक्तः (iv) वणः

(घ) 'तस्य' अस्मिन् पदे का विभक्तिः अस्ति?

(i) चतुर्थी (ii) षष्ठी
(iii) तृतीया (iv) प्रथमा

खण्डः 'ख'

रचनात्मक-कार्यम्

2. दशमकक्षायां प्रवेशं प्राप्तुं प्रधानाचार्यं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तैः शब्दैः पूरयत। 5×1=5

परीक्षाभवनम्
तिथिः -

प्रधानाचार्यः महोदयः,
राजकीय-उच्च-माध्यमिक-विद्यालयः,
हिसार-नगरम्।

(1) ..... ।

सविनयं (2) ..... अस्ति यद् अहं नवमकक्षायाः परीक्षायाम् 90% अङ्कान् गृहीत्वा उत्तीर्णः जातः। मम पूर्वविद्यालयः (3) ..... अतीव दूरे अस्ति। अहं (4) ..... विद्यालये विज्ञानविषये प्रवेशम् इच्छामि। कृपया भवन्तः (5) ..... प्रदाय माम् अनुगृह्णन्तु।

सधन्यवादम्।

भवदीयः शिष्यः
अरुणः

मञ्जूषा

प्रवेशं , निवेदनम् , माननीयाः, नवगृहात् , भवतां

3. निर्दिष्टचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दैः उचितरिक्तस्थानानि पूरयित्वा लिखत - 5×1=5



I. इदं चित्रम् ..... अस्ति।
II. चित्रे पुत्रः पितरं ..... ।
III. पिता ..... आशीर्वादं ददाति।
IV. बालिका ..... स्वीकरोति।
V. भित्तौ वृक्षचित्रं .....।

मञ्जूषा

पुत्राय, पुस्तकं, प्रणमति, लम्बते, आदर्शगृहस्य

खण्डः 'ग'

पठित-अवबोधनम्

4. निम्नलिखितं गद्यांशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

पुरा कस्मिंश्चिद् ग्रामे एका निर्धना स्त्री न्यवसत्। तस्याः च एका दुहिता विनम्रा मनोहरा चासीत्। एकदा माता स्थाल्यां तण्डुलान् निक्षिप्य पुत्रीम् आदिशत्- "सूर्यातपे तण्डुलान् खगेभ्यः रक्ष। "किञ्चित् कालादनन्तरम् एको विचित्रः काकः समुड्डीय तस्याः समीपम् अगच्छत् ।

अथवा

तस्य च गृहे लौहघटिता पूर्वपुरुषोपार्जिता तुलासीत्। तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः। ततः सुचिरं कालं देशान्तरं यथेच्छया भ्रान्त्वा पुनः स्वपुरम् आगत्य तं श्रेष्ठिनमुवाच- "भोः श्रेष्ठिन्! दीयतां मे सा निक्षेपतुला।" स आह- "भोः! नास्ति सा, त्वदीया तुला मूषकैर्भक्षिता" इति।

5. अधोलिखितश्लोकस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

निवर्तय मतिं नीचां परदाराभिमर्शनात्।
न तत्समाचरेद्धीरो यत्परोऽस्य विगर्हयेत्॥

अथवा

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥

6. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) कलापाः ललित-कोकिला-काकलीनाम्।

(ख) प्रकृतिरक्षयैव सम्भवति लोकरक्षेति न संशयः।

(ग) ज्ञात्वाऽपि जीविकाहेतोः रचयामि घटानहम्।

अथवा

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

वृत्तं यत्नेन संरक्षेत् वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः॥

अन्वयः :-

वृत्तं (1) ..... संरक्षेत् वित्तम् (2) ..... च याति च। वृत्तत: (3) ..... अक्षीण: (4) ..... तु हतो हत:।

मञ्जूषा

एति , क्षीण:, वित्तत:, यत्नेन।

7. अधः प्रदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - (केवलं प्रश्नत्रयम्) 3×1=3

अस्माभि: प्रकृति: रक्षणीया। तेन च पर्यावरणं रक्षितं भविष्यति। प्राचीनकाले लोकमङ्गलाशंसिन ऋषय: वने निवसन्ति स्म। यतो हि वने सुरक्षितं पर्यावरणमुपलभ्यते स्म।

प्रश्नाः :-

(1) अस्माभि: का रक्षणीया?
(2) ऋषय: कुत्र निवसन्ति स्म?
(3) वने कीदृशं पर्यावरणम् उपलभ्यते स्म?
(4) पर्यावरणं कथं रक्षितं भविष्यति?

8. निम्नलिखितश्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत – (केवलं प्रश्नद्वयम्) 2×1=2

तुलां लौहसहस्रस्य यत्र खादन्ति मूषका:।
राजन्तत्र हरेच्छ्येनो नात्र संशय:।।

प्रश्नाः :-

(क) के तुलां खादन्ति?
(ख) क: बालकं हरेत्?
(ग) तुला कस्य अस्ति?

9. स्थूलपदानि आधृत्य कोष्ठकात् चित्वा प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नत्रयम्) 3×1=3

(क) **सूर्योदयात्** पूर्वमेव बालिका तत्रोपस्थिता। (कस्मात् / कस्या:)
(ख) **मोदकानि** पूजानिमित्तानि रचितानि आसन्। (कानि / का:)
(ग) अजातशिशु: **मातृगर्भे** सुरक्षित: तिष्ठति। (कुत्र / कदा)
(घ) **खलानां** मैत्री आरम्भगुर्वी भवति। (कासाम् / केषां)
(ङ) **वनवृक्षा:** निर्विवेकं छिद्यन्ते। (का:/ के)

10. प्रश्नपत्रे लिखितश्लोकान् विहाय **'शेमुषी भाग-1'** पुस्तकाद् एकं कण्ठस्थं श्लोकं संस्कृतभाषया लिखत। 1x4=4

खण्डः – 'घ'

अनुप्रयुक्त-व्याकरणम्

11. वृद्धिसन्धेः अथवा यण्-सन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

12. द्वन्द्वसमासस्य अथवा बहुव्रीहिसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

13. करणकारकस्य अथवा कर्ताकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

14. यथानिर्दिष्टं शब्दरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

क. 'राम' शब्दस्य तृतीया-एकवचने।

ख. 'बालक' शब्दस्य षष्ठी-बहुवचने।

ग. 'लता' शब्दस्य पञ्चमी-बहुवचने।

घ. 'किम्' (पु.) शब्दस्य द्वितीया-बहुवचने।

ङ. 'अस्मद्' शब्दस्य चतुर्थी-एकवचने।

च. 'कवि' शब्दस्य सप्तमी-द्विवचने।

15. यथानिर्दिष्टं धातुरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

क. 'पठ्' धातोः लट्लकारस्य उत्तमपुरुष-द्विवचने।

ख. 'लिख्' धातोः लोट्लकारस्य प्रथमपुरुष-बहुवचने।

ग. 'गम्' धातोः लङ्लकारस्य मध्यमपुरुष-एकवचने।

घ. 'भू' धातोः विधिलिङ्लकारस्य मध्यमपुरुष-द्विवचने।

ङ. 'पा' (पिब्) धातोः लृट्लकारस्य प्रथमपुरुष-बहुवचने।

च. 'सेव्' धातोः लट्लकारस्य प्रथमपुरुष-एकवचने।

16. प्रदत्तोपपदविभक्तिवाक्येषु उचितविभक्तिं कोष्ठकात् चित्वा लिखत। (केवलं प्रश्नत्रयम्) 3×1=3

क. शिक्षकः ..... प्रति गच्छति। (विद्यालयं / विद्यालये)

ख. रामः ..... लिखति। (कलमेन / कलमात्)

ग. ..... दुग्धं रोचते। (बालकं / बालकाय)

घ. ..... उभयतः वृक्षाः सन्ति। (ग्रामात् / ग्रामं)

ङ. अलम् ..... । (विवादेन / विवादाय)

17. निम्नक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत। (केवलं प्रश्नद्वयम्) 2×1=2

क. न्यवसत् ख. प्राविशत् ग. वितरन्ति।

खण्डः – 'ङ'

पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

18. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 17×1=17

(क) 'च + एकाकिनी' इत्यत्र किं सन्धिपदम्?

(i) चेकाकिनी (ii)चैकाकिनी

(iii) एकाकिनी (iv) चोकाकिनी

(ख) 'नेच्छामि' इत्यत्र कः सन्धिविच्छेदः?

(i) न + इच्छामि (ii) न + एच्छामि

(iii) न + च्छामि (iv) ने + च्छामि

(ग) 'प्रतिदिनम्' इत्यस्मिन् पदे कः समासः?

(i) द्विगुः (ii) अव्ययीभावः

(iii) कर्मधारयः (iv) द्वन्द्वः

(घ) 'पुस्तकदासाः' इत्यस्य पदस्य विग्रहपदं किम्?

(i) पुस्तक दासाः (ii) पुस्तकानां दासाः

(iii) पुस्तकेन दासाः (iv) पुस्तकाय दासाः

(ङ) 'प्राचीनम्' इत्यस्य पदस्य विलोमपदं किम्?

(i) पुरातनम् (ii) पूर्वम्

(iii) नवीनम् (iv) जर्जरम्

(च) 'आत्मनः' इत्यस्य पदस्य विलोमपदं किम्?

(i) निजम्
(ii) परस्य
(iii) स्वयं
(iv) विहस्य

(छ) 'शिशुः' इत्यस्य शब्दस्य पर्यायपदं किम्?

(i) बालिका
(ii) जनकः
(iii) बालकः
(iv) पिता

(ज) 'समीरः' इत्यस्य पदस्य पर्यायपदं किम्?

(i) पावनः
(ii) पवनः
(iii) पावकः
(iv) पवित्रः

(झ) 'वि+क्री+ल्यप्' इत्यस्य संयोगे किं रूपम्?

(i) विक्रेतुम्
(ii) विक्रयणम्
(iii) विक्रीय
(iv) क्रीत्वा

(ञ) 'करणीयम्' इत्यस्मिन् पदे कः प्रत्ययः?

(i) क्त्वा
(ii) अनीयर्
(iii) शानच्
(iv) तुमुन्

(ट) 'एकोन षष्टिः' इत्यस्मिन् पदे किं संख्यावाचिपदम्?

(i) 95
(ii) 59
(iii) 49
(iv) 69

(ठ) '38' अङ्कस्थाने किं संख्यावाचिपदम्?

(i) अष्टाविंशतिः
(ii)अष्टादश
(iii) अष्ट
(iv) अष्टत्रिंशत्

(ड) स्वार्थान्धः मानवः' अत्र किं विशेष्यपदम्?

(i) स्वार्थान्धः (ii) अन्धः

(iii) मानवः (iv) स्वार्थः

(ढ) 'नवीनां वीणाम्' अत्र किं विशेषणपदम्?

(i) वीणाम् (ii) नवीनाम्

(iii) नवीनवीणा (iv) जीर्णाम्


(ण) 'लतानाम्' इत्यस्मिन् पदे का विभक्तिः?

(i) षष्ठी (ii) पञ्चमी

(iii) तृतीया (iv) द्वितीया

(त) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत -


बालकः प्रातः ..... वादने उत्तिष्ठति।



(i) द्वादश (ii) त्रयः

(iii) सप्त (iv) पञ्च

(थ) अहं सायं ..... भ्रमणाय गच्छामि।



(i) चतुर्वादने (ii) त्रयवादने

(iii) षड्वादने (iv) दशवादने